# Devaih Kritam 01 Durga Stotram

# देवैः कृतं १ दुर्गास्तोत्रम् १०

## Document Information

Text title : Devaih Kritam 01 Durga Stotram

File name : devaiHkRRitaM01durgAstotram10.itx

Category : devii, devI, bhaviShyapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | uttarabhAga | adhyAya 61/11-21||

Latest update : October 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 4, 2024

*sanskritdocuments.org*

# देवैः कृतं १ दुर्गास्तोत्रम् १०

अमरपतिमुकुटचुम्बितचरणाम्बुजसकलभुवनसुखजननी ।
जयति जगदीशवन्दिता सकलामलनिष्कला दुर्गा ॥ ११॥

विकृतनखदशनभूषणरुधिरवशाच्छुरितक्षतखड्गहस्ता ।
जयति नरमुण्डमुडितपिशितसुराहारकृच्चण्डी ॥ १२॥

प्रच्छादितशिखिगणोद्बलविकटजटाबद्धचन्द्रमणिशोभा ।
जयति दिगम्बरभूषा सिद्धवटेशा महालक्ष्मीः ॥ १३॥

करकमलजनितशोभा पद्मासनबद्धपद्मवदना च ।
जयति कमण्डलुहस्ता नन्दादेवी नतार्तिहरा ॥ १४॥

दिग्वसना विकृतमुखा फेत्कारोद्दामपूरितदिशौघा ।
जयति विकरालदेहा क्षेमङ्करी रौद्रभावस्था ॥ १५॥

क्रोशितब्रह्माण्डोदरसुरवरमुखरहुङ्कृतनिनादा ।
जयति मदातिमिहस्ता शिवदूती प्रथमशिवशक्तिः ॥ १६॥

मुक्ताट्टहासभैरवदुःसहतरचकितसकलदिक्चक्रा ।
जयति भुजगेन्द्रमणिशोभितकर्णा महातुण्डा ॥ १७॥

पटुपटहमुरजमर्दलझल्लरिझङ्कारनर्तितावयवा ।
जयति मधुव्रतरूपा दैत्यहरी भ्रामरीदेवी ॥ १८॥

शान्ता प्रशान्तवदना सिंहवरा ध्यानयोगतन्निष्ठा ।
जयति चतुर्भुजदेहा चन्द्रकला चन्द्रमण्डला देवी ॥ १९॥

पक्षपुटचञ्चुघातैः सञ्चूर्णितविविधशत्रुसङ्घाता ।
जयति शितशूलहस्ता बहुरूपा रेवती भद्रा ॥ २०॥

पर्यटति जगति हृष्टा पितृवननिलयेषु योगिनीसहिता ।
जयति हरसिद्धिनाम्नी हरसिद्धिर्वन्दिता सिद्धैः ॥ २१॥

इति भविष्यपुराणे उत्तरपर्वणि एकषष्टितमाध्यायान्तर्गतं
देवैः कृतं दुर्गास्तोत्रं समाप्तम् ।

भविष्यपुराण । उत्तरभाग । अध्याय ६१/११-२१ ॥

bhaviShyapurANa . uttarabhAga . adhyAya 61/11-21..

Proofread by PSA Easwaran

*Devaih Kritam 01 Durga Stotram*

pdf was typeset on October 4, 2024

Please send corrections to *sanskrit@cheerful.com*